૧૨૬૪

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Tot.

Ser. 12[illegible]

Title Diksha by [illegible] ham

Nos Fol

1295

Incomplete

Diksha Grehan Mas Pol	Title
	Author
	Editor
	Year, Vols.
	Publisher
1295	Remarks

श्रीगणेशायनमः अथदीक्षादिग्रहणेमासादिफलं। चैत्रेदुःखायदीक्षास्याद्वैशाखेसर्वसिद्धिदा
१ ज्येष्ठेदुःखप्रदादीक्षाआषाढेबंधुनाशिनी श्रावणेदुःखदाप्रोक्तानभस्येदुःखदामता आ
श्विनसर्वसिद्धिस्यात्कार्त्तिकेज्ञानबुद्धिदा २ शुभकृन्मार्गशीर्षेचपौषेज्ञानविनाशिनी माघे
मेधादिवृद्धिस्यात्फाल्गुनेसर्ववश्यकृत् ३ कृष्णपक्षेपवाशुक्लेदीक्षायांचप्रशस्यते प्रशस्ता
अथवासर्वेकुहूरिक्ताविवर्जयेत् ४ रेवत्युत्तररोहिण्युचित्रामृगशिराश्विनी हस्तपुष्यानुराधाच
दीक्षायांशुभदास्मृता ५ अर्कार्किगुरुशुक्रज्ञावाराःशस्ताःशशिस्तथा शुभयोगाःशस्ततराः
करणानिशुभानना ५ सुस्थिराणीचलग्नानिशुभांशकयुतानिच इतिदीक्षाग्रहणका
कः अथविशेषकालः अष्टम्यांचनवम्यांचदीपमालादिनत्रये चंद्रसूर्योपरागेषुपुष्यार्केचा
र्कवासरे ७ गुरुंसंपूज्यविधिवद्वस्त्रालंकारभूषणैः पादसंग्रहणंकृत्वादीक्षायाह्यात्वनुम
मा ८ दक्षिणश्रवणेमंत्रवदेद्वारत्रयंगुरुः भूगृह्योक्तविधानेनहोमपूर्वकमाचरेत् ९ १

इतिमंत्रग्रहणं इतिमंत्रांशकं वक्ष्येमेरुतंत्रेशिवोदितं मंत्रसाधकयोर्वर्णाःस्वरांश्चक्रमतःपृ
थक् १० विधायसिद्धसाध्यादिगणयेन्मंत्रवित्तमः अनुस्वारविसर्गंचजिह्वामूलीयसंज्ञकं ११
गृहीत्वासंयुतंवर्णगणनांकारयेद्गुरुः वित्तमात्रकृतनामगुरुणायत्नकीर्त्तितं १२ संहितोच्चार
णात्प्राप्तंकेवलाक्षरवर्जितं अपभ्रंशाक्षरंयत्नात्साधकोनामशोधयेत् १३ व्यंजनैर्व्यंजनंशोध्यं
स्वरैर्नामस्वरांश्चयत्नात् आद्यमाद्येनसंशोध्यंद्वितीयेनद्वितीयकं १४ अनेनैवविधानेनशोधयेच्छोध्या
यथाक्रमं आद्यंतमक्षरंनाम्नोगणयेच्चतदादितः १५ यावन्मंत्राक्षरस्थानंमात्रकायामयंक्रमः चतुष्कं
चतुष्कंचपूरित्वापुनःपुनः १६ सिद्धसाध्यसुसिद्धारिसंख्ययैवयथाक्रमं एवंक्रमेणमंत्राणां
सर्वेषांगणनेकृते १७ कियात्सिद्धःकियत्साध्यंइत्याद्यपिविचारयेत् यंत्रमंत्रभेदेतत्सिद्ध्यादीनांच
लक्षणं १८ समंत्रःसिद्धइत्युक्तःसाध्योनैवसिद्धिवर्जितः रिपुवर्जनंचयंत्रसुसिद्धइहोच्यते सुसिद्धेनरि
हीनंचयंत्रंशत्रुतदाहितिस्थिरा आदिसिद्धोत्तसिद्धोयोमध्यसिद्धोथवाभवेत् २० सुसिद्धःसतुविज्ञेयःस
र्वकामफलप्रदः आदावंतेसुसिद्धोयस्त्रैलोक्यमपिदास्यति आद्यावंतेचसाध्योयःसोपिकष्टेनसिध्य
ति आद्यावंतेचयःशत्रुःसाधकंमारयत्फलं २२ सिद्धःसिध्यतिकालेनसाध्योयोगजपादिभिः सुसि

दुःस्मरणादेवरिपुसाधकमारकः एवंमंत्रांशकेज्ञात्वासुसिद्धमेवचसाध्यंनाथचक्रचिद्धार्थसिद्ध
थमिंत्रमुत्तमं २४ शास्त्राद्गुरुमुखाच्चैवज्ञात्वाद्येसाधयेत्पुनः उत्तरापदहेणग्रामेरवेटके सिद्धसंज्ञमे
२ वनेचोपवनेतीर्थेमहापीठेचसागरे पर्वतेसिद्धवृक्षेच कुलवृक्षेस्मशानके गुहामातृगणेरण्ये क्षेत्रे
वापमहानदे सिद्धस्थानेशिवक्षेत्रेगेहेचाथयथोदिते २५ दीपस्थानंविनिर्भिद्यकूर्मचक्रेसुसि
द्धिदं अष्टवर्गैलिखेधीमान्मध्यसौम्यविदिक्क्रमात् अस्तीशानपदेक्षेत्रेवेदानेकोष्टके तथा
हृदयंभुजकक्ष्यांघ्रियुगाद्याः क्रमगाःस्थिताः पादादिपसंस्थानिलेषुक्षेत्राधिपाइमे अमृतंहृ
ष्टसंचैवभूतराजंचवासुकिं तथैवाजगरंचैवपूर्वशक्तिमुखंधुरंतथा पद्मयोनिमहाशखंकूष्मा
ण्डमनुक्रमात् मध्यात्पूर्वादितःपूज्यायंत्रमंत्राश्चकथ्यतां ॐ अमुकक्षेत्र
पालसर्वविघ्नान्हन२ आलि बलिंपिशितंगृह्ण२ खर२ल२ पेरलवक्षे २
त्रपालसर्वविघ्नान्हन २ स्वाहा अनेनमंत्रेणक्षेत्रपालाःपूज्याः पत्रयन्त्र